ॐ श्रीः

॥ "ॐ भद्रं नो अपि वातय मनः," ॥

२

वैदिकमातृतत्त्वशक्तयः प्रत्यक्षब्रह्मरूपाः वाग्विभूतयः ॥
परब्रह्ममानात्मिकाः वाग्देवतामूर्तयः सत्यकीर्तयः ॥
वेदमन्त्रदर्शनपरायणाः ऋषिकाः स्त्रीव्यक्तयः ॥

॥ ब्रह्मवादिन्यः ॥

" गोधा घोषा विश्ववारा ऽ-
पालोपनिषन् निषत् ॥
ब्रह्मजाया जुहूर्नामा -
अगस्त्यस्य स्वसा ऽदितिः ॥ १ ॥

" इन्द्राणी चेन्द्रमाता च
सरमा रोमशोर्वशी ॥
लोपामुद्रा च नद्यश्च
यमी नारी च शश्वती ॥ २ ॥

" श्रीर्लाक्षा सार्पराज्ञी वाक् -
श्रध्दा मेधा च दक्षिणा ॥
रात्री सूर्या च सावित्री
" ब्रह्मवादिन्य ईरिताः ॥ ३ ॥

॥ इति ॥ ऋग्वेद सर्वानुक्रम परिभाषा ॥

" अथ ऋग्वेदे स्तुतानां "ब्रह्मवादिनीनां "ऋषिकाणां स्त्रीणांनामानि, तथा तासां मन्त्रदर्शनानि, तेषां सूक्तानां मण्डलसूक्तादीनि स्थानानि

१ गोधा - मान्धातुः यौवनाश्वस्य पत्नी॥ (ऋक्. मं. १०।१३४।१-७)

२ घोषा - काक्षीवती॥ (,, ,, १०।३९।१-१४)

३ विश्ववारा - आत्रेयी॥ (ऋक्. ५।२८।१-६)

४ अपाला - आत्रेयी॥ (ऋक्. ८।९१।१-७)

५ उपनिषत् - (निषत्) इन्द्राणी॥ (ऋक्. १०।१४५।१-६)

६ ब्रह्मजाया जुहूः॥ (ऋक्. १०।१०९।१-७)

७ अगस्त्य स्वसा - बन्धु प्रभृतीनां माता॥ (ऋक्. १०।६०।६)

८ अदितिः - दाक्षायणी (ऋक्. १०।७२।१-९)

९ इन्द्राणी - इन्द्रपत्नी॥ इन्द्रश्च दम्पती॥ (ऋक्. १०।८६।१-२३)

१० इन्द्रमातरः - देवजामयः॥ (ऋक्. १०।१५३।१-५)

११ सरमा - इन्द्रस्य दूती॥ (देवशुनी) (ऋक्. १०।१०८।१-११)

१२ रोमशा - भावयव्यस्य पत्नी॥ (ऋक्. १।१२६।१-७)

१३ उर्वशी - पुरूरवसः ऐळस्य पत्नी॥ (ऋक्. १०।९५।१-१८)

१४ लोपामुद्रा - अगस्त्यस्य पत्नी (ऋक्. १।१७९।१-६)

१५ नद्यः - विश्वामित्रश्च, तयोः संवादः (ऋक्. ३।३३।१-१३)

१६ यमी - वैवस्वती। (भाववृत्तम्) (ऋक्. १०।१५४।१-५)

१७ - यमी - वैवस्वती ॥ यमो विवस्वान् (तयोः संवादः (ऋक् १०।१०।१-१४)

१८ नारी शश्वती - आङ्गिरसी। (प्लायोगेः आसङ्गस्य पत्नी (८।१।३०-३४ ऋच (५)

१९ सार्पराज्ञी ॥ (ऋक् १०।१८९।१-३)

२० वाक् - आम्भृणी ॥ (ऋक् १०।१२५।१-८)

२१ श्रद्धा - कामायनी ॥ (ऋक् १०।१५१।१-५)

२२ दक्षिणा - प्राजापत्या ॥ (ऋक् १०।१०७।१-११)

२३ रात्री - भारद्वाजी ॥ (ऋक् १०।१२७।१-८)

२४ सूर्या सावित्री ॥ (सूर्याविवाहः) (ऋक् १०।८५।१-४७)

॥ इति परिभाषानिर्दिष्टानां ब्रह्मवादिनीनां नामानि दर्शनानि च समाप्तानि ॥

२५ शची - पौलोमी ॥ (ऋक् १०।१५९।१-६

२६ इन्द्रस्नुषा - वसुक्रपत्नी (ऋक् १०।२८।१)

२७ सिकता निवावरी ॥ (ऋक् ९।८६।११-२०)

२८ पृश्नयः - अजाः ॥ (ऋक् ९।८६।२१-३०)

२९ अकृष्टा माषाः अपि सहिताः त्रयः ॥ सि. पृ. (ऋक् ९।८६।३१-४०)

३० काश्यप्यौ शिखण्डिन्यौ अप्सरसौ ॥ (ऋक् ९।१०४।१-६)

॥ अथ औपनिषदाः ब्रह्मवादिन्यः ॥

३१ मेधा - देवी ॥ (ना. उप.

३२ उमा हैमवती ॥ (केनोप.

मैत्रेयी सुलभा ॥ (बृ. उप.

... र्गी वाचक्नवी ॥ (बृ. उप.

(२)
(१) अथ ~~प्रथमं~~ सूक्तम् ॥ द्वितीयं

(२) "घोषा" काक्षीवती

॥ ऋक्संहिता मण्डलं-१०। सूक्तम्-३९। ऋचः १-१४ ॥

॥ घोषा काक्षीवती ऋषिका। अश्विनौ देवता। १-१३ जगती छन्दः ॥
१४ त्रिष्टुप् छन्दः ॥ तथा च सर्वानुक्रमसूत्रम् ॥
"यो वां न्यूना काक्षीवती घोषा आश्विनं हि त्रिष्टुबन्त्याम्" इति ॥

"यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता ॥
शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥ १॥
चोदयतं सूनृताः पिन्वतं धिय उत्पुरन्धीरीरयतं तदुश्मसि ॥
यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥ २॥
अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चित् ॥
अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥ ३॥
युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः ॥
निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥ ४॥
पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा ॥
ता वां नु नव्याववसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥ ५॥
इयं वामह्वे शृणुतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम् ॥
अनापिरज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतम् ॥ ६॥
युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम् ॥
युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरन्धये ॥ ७॥
युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः ॥
युवं वन्दनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥ ८॥

युवं ह रेभं वृषणा गुहाहितमुदैरयतं ममृवांसमश्विना ॥
युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये ॥ ९ ॥
युवं श्वेतं पेदवेऽश्विनाऽश्वं नवभिर्वाजैर्नवती च वाजिनम् ॥
चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवम् ॥ १० ॥
न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयम् ॥
यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥ ११ ॥
आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना ॥
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥ १२ ॥
ता वर्तिर्यातं जयुषा वि पर्वतमपिन्वतं शयवे धेनुमश्विना ॥
वृकस्य चिद् वर्तिकामन्तरास्याद् युवं शचीभिर्ग्रसिताममुञ्चतम् ॥ १३ ॥
एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथम् ॥
न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥ १४ ॥

## (३) ॥ अथ ~~द्वितीयं~~ तृतीयं सूक्तम् ॥ (२)

ऋक् मं. १०।४०।१-१४ ॥ घोषा काक्षीवती ऋषिका। अश्विनौ देवता। जगती छन्दः ॥ ~~सर्वानु~~ रथं यान्तम् ॥

रथं यान्तं कुह को ह वां नरा प्रति द्युमन्तं सुविताय भूषति ॥
प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तो वहमानं धिया शमि ॥ १ ॥
कुह स्विद् दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ॥
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥ २ ॥
प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तो यजता गच्छथो गृहम् ॥
कस्य ध्वस्रा भवथः कस्य वा नरा राजपुत्रेव सवनाव गच्छथः ॥ ३ ॥

युवं मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।
युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥ ४ ॥
युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा ।
भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥ ५ ॥
युवं कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।
युवोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥ ६ ॥
युवं ह भुज्युं युवमश्विना वशं युवं शिञ्जारमुशनामुपारथुः ।
युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥ ७ ॥
युवं ह कृशं युवमश्विना शयुं युवं विधन्तं विधवामुरुष्यथः ।
युवं सनिभ्य स्तनयन्तमश्विनाऽप व्रजमूर्णुथः सप्तास्यम् ॥ ८ ॥
जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु ।
आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्ने भवति तत्पतित्वनम् ॥ ९ ॥
जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥ १० ॥
न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।
प्रियोस्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥ ११ ॥
आ वामगन्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ॥ १२ ॥
ता मन्दसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे ।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम् ॥ १३ ॥

क्व स्विदद्य कतमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती ॥
क ईं नि येमे कतमस्य जग्मतु र्विप्रस्य वा यजमानस्य वा गृहम् ॥ ५ ॥

(४) ॥ अथ तृतीयं सूक्तम् ॥ (३) चतुर्थं

(३) (५) विश्ववारा - आत्रेयी ॥

॥ ऋक्. मं. ५।२८।१-६ ॥

विश्ववारा आत्रेयी ऋषिका। अग्निः देवता। १-३ त्रिष्टुप् छन्दः॥
२ जगती छन्दः। ४ अनुष्टुप् छन्दः। ५-६ गायत्री छन्दः ॥

तथा च सर्वानुक्रमसूत्रम् " " समिद्धो विश्ववारा ऽऽत्रेयी
त्रिष्टुब् जगती त्रिष्टुब् अनुष्टुब् गायत्र्यौ ",॥

समिद्धो अग्नि र्दिवि शोचिरश्रेत् प्रत्यङ्ङुषसमुर्विया वि भाति॥
एति प्राची विश्ववारा नमोभि र्देवाँ ईळाना हविषा घृताची ॥१॥
समिध्यमानो अमृतस्य राजसि हवि ष्कृण्वन्तं सचसे स्वस्तये ॥
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्य मग्ने नि च धत्त इत् पुरः॥ २॥
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ॥
सं जास्पत्यं सुयम मा कृणुष्व शत्रूयता मभि तिष्ठा महाँसि ॥ ३॥
समिद्धस्य प्र महसोऽग्ने वन्दे तव श्रियम् ॥
वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥ ४॥
समिद्धो अग्न आहुत देवान् यक्षि स्वध्वर ॥
त्वं हि हव्यवाळसि ॥ ५॥
आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे ॥
वृणीध्वं हव्यवाहनम् ॥ ६॥

(५) ॥ अथ ~~चतुर्थं~~ सूक्तम् ॥ (५) पञ्चमं

(४) अपाला - आत्रेयी ॥

ऋक्. मं. ८।९१।१-७ ॥ अपाला आत्रेयी ऋषिका। इन्द्रो देवता।
१,२ पङ्क्तिः छन्दः। ३-७ अनुष्टुप् छन्दः ॥

तथा च सर्वानुक्रमसूत्रम् - " कन्या वाः सप्त आत्रेयी अपाला. इतिहासः ऐन्द्रः आनुष्टुभं द्विपङ्क्त्यादि " ॥

कन्या३ वारवायती सोममपि स्रुताऽविदत् ॥
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥१॥
असौ य एषि वीरको गृहं गृहं विचाकशत् ॥
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥२॥
आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि ॥
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव ॥३॥
कुविच्छकत् कुवित् करत् कुविन्नो वस्यसस्करत् ॥
कुवित् पतिद्विषो यतीरिन्द्रेण सङ्गमामहै ॥४॥
इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ॥
शिरस्ततस्योर्वरामादिदं म उपोदरे ॥५॥
असौ च या न उर्वराऽऽदिमां तन्वं१ मम ॥
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥६॥
खे रथस्य खेऽनसः खे युगस्य शतक्रतो ॥
अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥७॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ॥
तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥५॥
यद् देवा अदः सलिले सुसंरब्धा अतिष्ठत ॥
अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥६॥
यद् देवा यतयो यथा भुवनान्यपिन्वत ॥
अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन ॥७॥
अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि ॥
देवाँ उप प्रैत् सप्तभिः परा मार्ताण्डमास्यत् ॥८॥
सप्तभिः पुत्रैरदितिरुप प्रैत् पूर्व्यं युगम् ॥
प्रजायै मृत्यवे त्वत् पुनर्मार्ताण्डमाभरत् ॥९॥

२

(६) ॥ अथ सप्तमं सूक्तम् ॥ षष्ठं (ऋग्वेद मन्त्र)

(५) (*) इन्द्राणी ॥ इमामिन्द्राणी उपनिषत्. सपत्नी बाधनमानुष्टुभं पंक्त्यन्त

ऋक्. मं. १०।१४५।१-६ ॥ इन्द्राणी ऋषिका। उपनिषत्(सपत्नी-बाधनम्। १-५ अनुष्टुप्। ६ पंक्तिः छन्दः ॥

इमां खनाम्योषधिं वीरुधं बलवत्तमाम् ॥
यया सपत्नीं बाधते यया संविन्दते पतिम् ॥१॥
उत्तानपर्णे सुभगे देवजूते सहस्वति ॥
सपत्नीं मे परा धम पतिं मे केवलं कुरु ॥२॥
उत्तराऽहमुत्तर उत्तरेदुत्तराभ्यः ॥
अधा सपत्नी या ममाधरा साऽधराभ्यः ॥३॥

(७) ॥ अथ पञ्चमं सूक्तम् ॥ ~~(५)~~ सप्तमं

(५)- ब्रह्मजाया जुहूः ॥

ऋक्. मं. १०।१०९।१-७ ॥ जुहूः ब्रह्मजाया ऋषिका। विश्वेदेवाः देवता। १-५ त्रिष्टुप् छन्दः। ६, ७ अनुष्टुप् छन्दः॥ **सर्वानु. सूत्रम्:**
"तेऽवदन् सप्त जुहूर्ब्रह्मजाया, **ब्राह्मो वो र्ब्रनाभा वैश्वदेवं त्वानुष्टुबन्त्याम्॥**

तेऽवदन् प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ॥
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ॥१॥
सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ॥
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥२॥
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन् ॥
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥
देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः ॥
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥४॥
ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम् ॥
तेन जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ॥५॥
पुनर्वै देवा अददुः पुनर्मनुष्या उत ॥
राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥६॥
पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ॥
ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ॥७॥

(७) (६) अगस्त्यस्य स्वसा ॥

ऋक्. मं. १०।६०।२,(६) अगस्त्यस्य स्वसा ऋषिका। ऐक्ष्वाको राजा-
असमातिः देवता। २ गायत्री छन्दः। ६ अनुष्टुप् छन्दः॥

असमातिं नितोशनं त्वेषं निययिनं रथम् ॥
भुजे रथस्य सत्पतिम् ॥ २ ॥ "षष्ठ्या ऽगस्त्यस्य स्वसा मातैषां राजानमस्तौत् ॥ ऋक.

" अगस्त्यस्य नद्भ्यः सप्ती युनक्षि रोहिता ॥
पणीन् न्यक्रमीरभि विश्वान् राजन् अराधसः ॥ ६ ॥

(८) ॥ अथ ~~षष्ठं~~ सूक्तम् ॥ ~~(६)~~ अष्टमं
(८) अदितिः दाक्षायणी ॥

ऋक्. मं. १०।७२।१-९ ॥ अदितिः दाक्षायणी ऋषिका। देवाः
देवताः। अनुष्टुप् छन्दः ॥

"देवानां नव लौक्या वा बृहस्पतिः दक्षायणी अदितिर्वा" देवमानुष्टुभम्" स. सूत्रम्"

" देवानां नु वयं जाना प्र वोचाम विपन्यया ॥
उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥ १ ॥
ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् ॥
देवानां पूर्व्ये युगे ऽसतः सदजायत ॥ २ ॥
देवानां युगे प्रथमे ऽसतः सदजायत ॥
तदाशा अन्वजायन्त तदुत्तानपदस्परि ॥ ३ ॥
भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त ॥
अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥ ४ ॥

(९) ॥ अथ चतुर्विंशं सूक्तम् ॥ (२४) नवदं

(२५)(९) इन्द्राणी - इन्द्रः ॥

ऋक्. मं. १०। ८६। १-२३ ॥ वृषाकपिः इन्द्राणी - इन्द्रश्च ऋषयः
इन्द्रो देवता। पंक्तिः छन्दः ॥२-६, ९,१०, १५-१८ इन्द्राणी ऋषिका॥
"विहि श्रथिकैन्द्रो वृषाकपिरिन्द्राणीन्द्रश्च समूदिरे पाङ्क्तम्।

"वि हि सोतो रसृक्षत नेन्द्रं देवममंसत ॥
यत्रामदद् वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ ॥१॥
"परा हीन्द्र धावसि वृषाकपेरति व्यथिः ॥
नो अह प्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः ॥ ॥२॥ (इन्द्राणी)
"किमयं त्वां वृषाकपिश्चकार हरितो मृगः ॥
यस्मा इरस्यसीदु न्वर्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र उत्तरः ॥ ॥३॥ इं.)
"यमिमं त्वं वृषाकपिं प्रियमिन्द्राभि रक्षसि ॥
श्वान्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥ ॥४॥ इं.
"प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ॥
शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ॥ ॥५॥ इं.
"न मत् स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ॥
न मत् प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ॥ ॥६॥ इं.
"उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति ॥
भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः ॥ ॥७॥
"किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ॥
किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥ ॥८॥

" अवीरामिव मामयं शरारुरभि मन्यते ॥
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥
॥ ९ ॥ (इं)
" संहोत्रं स्म पुरा नारी समनं वाऽव गच्छति ॥
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥
॥ १० ॥ (इं)
" इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ॥
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥
॥ ११ ॥
" नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ॥
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥
॥ १२ ॥
" वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ॥
घसत् त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः ॥
॥ १३ ॥
" उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ॥
उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥
॥ १४ ॥
" वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत् ॥
मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः ॥
॥ १५ ॥ (इं)
" न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत् ॥
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥
॥ १६ ॥ (इं)
" न सेशे यस्य रोमशं निषेदुषो विजम्भते ॥
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृद् विश्वस्मादिन्द्र उत्तरः ॥
॥ १७ ॥ (इं)
" अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ॥
असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः ॥
॥ १८ ॥ (इं)

" अयमेमि विचाकशद् विचिन्वन् दासमार्यम् "
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः ॥
॥१९॥
" धन्व च यत् कृन्तत्रं च कति स्वित् ता वियोजना ॥
नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः ॥
॥ २० ॥
" पुनरेहि वृषाकपे सुविता कल्पयावहै ॥
य एषः स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥
॥२१॥
" यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन ॥
क्वऽस्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः ॥
॥२२॥
" पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् "
भद्रं भल त्यस्या अभूद् यस्या उदरमामयद् विश्वस्मादिन्द्र उत्तरः ॥
॥ २३ ॥

(२६) इन्द्रस्नुषा वसुक्रपत्नी ऋषिका "

(ऋक्. मं. १०।२८।१)

" इन्द्रस्नुषा वसुक्रपत्नी ऋषिका। इन्द्रो देवता। त्रिष्टुप् छन्दः "
" विश्वो हि द्वादश इन्द्रवसुक्रयोः संवाद ऐन्द्र। सूक्तस्य प्रथमया -
इन्द्रस्य स्नुषा परोक्षवदिन्द्रमाह। " इति सर्वानु. मन्त्रम् "

" विश्वो ह्यऽन्यो अरिराजगाम ममेदह श्वशुरो नाजगाम "
जक्षीयाद् धाना उत सोमं पपीयात् स्वाशितः पुनरस्तं जगायात् ॥
॥ १ ॥

न ह्य॑स्या नाम॑ गृभ्णामि॒ नो अ॒स्मिन् र॑मते॒ जने॑ ॥
परा॑मे॒व प॑रा॒वतं॑ स॒पत्नीं॑ गमयामसि ॥ ४ ॥
अ॒हम॑स्मि॒ सह॑मा॒नाऽथ॒ त्वम॑सि सास॒हिः ॥
उ॒भे सह॑स्वती भू॒त्वी स॒पत्नीं॑ मे सहावहै ॥ ५ ॥
उप तेऽधां सहमाना मभि त्वाऽधां सहीयसा ॥
मा मनु प्र ते मनो वत्सं गौरिव धावतु
पथा वारिव धावतु ॥ ६ ॥

~~(१) इन्द्राणी~~ २

(३७) ॥ अथ अष्टमं सूक्तम् ॥ ८२ाम

(१७) इन्द्रमाता ॥

ऋक् मं.१०।१५३।१-५॥ इन्द्रमातरः देवजामयः ऋषिकाः। इन्द्रः देवता। गायत्री छन्दः॥

" ईङ्खयन्ती देवजामयः इन्द्रमातरो गायत्रम् ॥ (सर्वानुक्रम) "

ई॒ङ्खय॑न्तीरप॒स्युव॒ इन्द्रं॑ जा॒तमुपा॑सते। भे॒जा॒नासः॑ सु॒वीर्य॑म् ॥ १ ॥
त्वमि॑न्द्र॒ बला॒दधि॒ सह॑सो जा॒त ओज॑सः ॥
त्वं वृ॑ष॒न् वृषेद॑सि ॥ २ ॥
त्वमि॑न्द्रासि वृत्र॒हा व्य१॒॑न्तरि॑क्षमतिरः ॥
उद् द्याम॑स्तभ्ना॒ ओज॑सा ॥ ३ ॥
त्वमि॑न्द्र स॒जोष॑स म॒र्कं बि॑भर्षि बा॒ह्वोः ॥
वज्रं॒ शिशा॑न॒ ओज॑सा ॥ ४ ॥
त्वमि॑न्द्राभि॒भूर॑सि॒ विश्वा॑ जा॒तान्योज॑सा ॥ स विश्वा॒ भुव॒ आभ॑वः ॥ ५ ॥

(३३) ॥ अथ ~~नवमं~~ सूक्तम् ॥ ॥क॥८२॥

(१९) ॥ सरमा ॥

ऋक् मं. १०।१०८।१-११ ॥ सरमा ऋषिका। पणयः ऋषयः ॥

सरमा-पणीनां संवादः। ऋक्. १,३,५,७,९ पणयः ऋषयः। सरमा देवता॥

ऋक्. २,४,६,८,१०,११, सरमा ऋषिका। पणयः देवता॥ त्रिष्टुप् छन्दः॥

"किमिच्छन्ती पणिभिरसुरैः निगूळ्हा गा अन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां अयुग्भिः पणयो मित्रीयन्तः प्राचुः, सा तान् युग्मान्त्याभिः -
अनिच्छन्ती प्रत्याचष्टे॥ **इति सर्वानुक्रमसूत्रम्**॥

"किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः॥
काऽस्मेहितिः का परितक्म्याऽऽसीत् कथं रसाया अतरः पयाँसि ॥१॥
इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन् वः॥
अतिष्कदो भियसा तन्न आवत् तथा रसाया अतरं पयाँसि ॥२॥
कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्॥
आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ॥३॥
नाहं तं वेद दभ्यं दभत् स यस्येदं दूतीरसरं पराकात्॥
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ॥४॥
इमा गावः सरमे या ऐच्छः परि दिवो अन्तान् सुभगे पतन्ती॥
कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा ॥५॥
असेन्या वः पणयो वचाँस्यनिषव्यास्तन्वः सन्तु पापीः॥
अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात् ॥६॥

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभि न्यृष्टः ॥
रक्षन्ति तं पणयो ये सुगोपा रेकु पद मलकमा जगन्थ ॥७॥
एह गमन् ऋषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः ॥
त एत मूर्वं विभजन्त गोना मथैतद् वचः पणयो वमन् इत् ॥८॥
एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ॥
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥९॥
नाहं वेद भ्रातृत्वं नो स्वसृत्व मिन्द्रो विदु रङ्गिरसश्च घोराः॥
गोकामा मे अच्छदयन् यदाय मपात इत पणयो वरीयः ॥१०॥
दूर मित पणयो वरीय उद् गावो यन्तु मिनती ऋतेन ॥
बृहस्पति र्या अविन्द न्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥११॥

२

(३२) ॥ अथ ~~दशमं~~ सूक्तम् ॥ ~~(१०)~~ ३१८२ं

(१२) रोमशा ॥ भावयव्यः ॥

ऋक्.मं. १।१२६।६,७ ॥ ६-भावयव्यः, ७ रोमशा, अनुष्टुप् छन्दः ॥

॥ अमन्दानिति ०– भावयव्य-रोमशयोर्दम्पत्योः संवादः. ऋ.मं.

ऋक्.६, भावयव्यः ऋषिः । रोमशा देवता । ७ रोमशा ऋषिका । भावयव्यो देवता ॥

आगधिता परिगधिता या कशीकेव जङ्गहे ॥
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६॥ इति भावयव्यः ॥
उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ॥
सर्वाऽहमस्मि रोमशा गन्धारीणा मिवाविका ॥७॥ इति रोमशा

२

(१३) ॥ अथ ~~एकादशं~~ त्रयोदशं सूक्तम् ॥ (११)

(१३) ॥ उर्वशी ॥ "इम इषुधि कदा जु देवो ऽत्यसृप्रा
अचोदि तिस्रस्तोत्र वाद्यं पीठ्या।
उर्वश्या।"

ऋक्. मं. १०।९५।—१—१८॥ ऋक्. १, ३, ६, ८—१०, १२, १४, १७, -
पुरुरवा ऐळः। ऋषिः। उर्वशी देवता। ऋक्. २, ४, ५, ७, ११, १३,
१५, १६। १८ उर्वशी ऋषिका। पुरूरवाः देवता॥ त्रिष्टुप् छन्दः॥

"हये क्षुना- उर्वशीम्- ऐळः पुरूरवाः पूर्वेषितान् कामान् पुनरासाद्य,
अवरोद्धुमैच्छत्, सा तमनिच्छन्ती प्रत्याचष्टे,·- ✝ (स. मन्त्रम्)

"हये जाये मनसा तिष्ठ घोरे वचाँसि मिश्रा कृणवावहै नु॥
न नो मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन्॥ १॥ (पुरूरवाः)

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव॥
पुरूरवः पुनरस्तं परेहि दुरापना वातइवाहमस्मि॥ २॥ (उर्वशी)

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः॥
अवीरे क्रतौ वि दविद्युतन् नोरा न मायुं चितयन्त धुनयः॥ ३॥ (पुरू.)

सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात्॥
अस्तं ननक्षे यस्मिञ्चाकन् दिवानक्तं श्नथिता वैतसेन॥ ४॥ (उर्वशी)

त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मे ऽव्यत्यै पृणासि॥
पुरूरवो ऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः॥ ५॥ (उर्वशी)

या सुजूर्णिः श्रेणिः सुम्नआपिर्हृदेचक्षुर्न ग्रन्थिनी चरण्युः॥
ता अञ्जयो ऽरुणयो न सस्रुः श्रिये गावो न धेनवो ऽनवन्त॥ ६॥ (पुरू.)

समस्मिञ्जायमान आसत ग्ना उतेमवर्धन् नद्यः स्वगूर्ताः॥
महे यत् त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः॥ ७॥ (उर्वशी)

सचा यदासु जहतीष्वत्क ममानुषीषु मानुषो निषेवे ॥
(पुरूरवाः)
अप स्म मत् तरसन्ती न भुज्यु ता अत्रसन् रथस्पृशो नाश्वाः ॥८॥
यदासु मर्तो अमृतासु निस्पृक् सङ् क्षोणीभिः क्रतुभि र्न पृङ्क्ते ॥
(पुरू॰)
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥ ९॥
विद्युन् न या पतन्ती दविद्योद् भरन्ती मे अप्या काम्यानि ॥
(पुरूरवाः)
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥१०॥
जज्ञिष इत्था गोपीथ्याय हि दधाथ तत् पुरूरवो म ओजः ॥
(उर्वशी)
अशासं त्वा विदुषी सस्मिन्नहन् न म आ शृणोः किमभुग् वदासि ॥ ११॥
कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद् विजानन् ॥
(पुरू॰)
को दम्पती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥
प्रति ब्रवाणि वर्तयते अश्रु चक्रन् न क्रन्ददाध्ये शिवायै ॥
प्र तत् ते हिनवा यत् ते अस्मे परेह्यस्तं न हि मूर मापः ॥१३॥(उर्वशी)
सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गन्तवा उ ॥
(पुरूरवाः)
अधा शयीत निर्ऋते रुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥
पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उक्षन् ॥
(उर्वशी)
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥१५॥
यद् विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ॥
(उर्वशी)
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥१६॥
अन्तरिक्षप्रां रजसो विमानी मुप शिक्षाम्युर्वशीं वसिष्ठः ॥
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥१७॥
(पुरूरवाः)

इति त्वा देवा इम आहुरैळ यथेमेतद् भवसि मृत्युबन्धुः ॥
प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥
(उर्वशी)

## (३४) ॥ अथ चतुर्दशं सूक्तम् ॥ ~~(१२)~~

### (१४) लोपामुद्रा ॥

ऋक्. मं. १।१७९।१-६ ॥ १.२. लोपामुद्रा ऋषिका। ३,४, अगस्त्यः॥
५,६, अन्तेवासी ब्रह्मचारी। रतिः ॥१-४,६ त्रिष्टुप्। ५ बृहती ॥
"तथा च सर्वानुक्रमसूत्रम्- "पूर्वीः षड् जायापत्यो लोपामुद्रया: अगस्त्यस्य च ऋचाभ्यां रत्यर्थं संवादं श्रुत्वा अन्तेवासी ब्रह्मचारी अन्त्ये बृहत्यादी अपश्यत् ". इति ॥

"पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ॥
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥१॥
ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि ॥
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥२॥
न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव ॥
जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव ॥३॥
नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् ॥
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥४॥
इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ॥
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥५॥
अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ॥
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥६॥

(३५) ॥ अथ त्र्योदशं सूक्तम् ॥

(१५) नद्य: ॥

ऋक्. मं. ३।३३।१-१३ ॥ नद्य: ऋषिका:। विश्वामित्रश्च ऋषि: ॥

(संवादो नदीभि विश्वामित्रस्य। ६,७ इन्द्र:।१-१२ त्रिष्टुप्।१३ अनुष्टुप् ॥

(सर्वानुक्रमसूत्रम्- " प्र पर्वतानां सप्तोना संवादो नदीभि: ) (छन्द: ॥

४,८,१० नदी ॥ विश्वामित्रस्योक्तितीर्षिस्तत्र नदी वाक्यं चतुर्थीषष्ठ्यष्टमीदशम्य:

(षष्ठी सप्तम्यो स्त्विन्द्रस्तुति: अन्त्या अनुष्टुप् " इति ॥

" प्र पर्वताना मुशती उपस्थादश्वे इव विषिते हासमाने ॥

गावेव शुभ्रे मातरा रिहाणे विपाट् छुतुद्री पयसा जवेते ॥१॥

इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथ: ॥

समाराणे ऊर्मिभि: पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥२॥

अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म ॥

वत्समिव मातरा संरिहाणे समानं योनिमनु सञ्चरन्ती ॥३॥

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्ती: ॥

न वर्तवे प्रसव: सर्गतक्त: किंयुर्विप्रो नद्यो जोहवाति ॥४॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवै: ॥

प्र सिन्धुमच्छा बृहती मनीषाऽवस्युरह्वे कुशिकस्य सूनु: ॥५॥

इन्द्रो अस्मा" अरदद् वज्रबाहुरपाहन् वृत्रं परिधिं नदीनाम् ॥

देवोऽनयत् सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वी: ॥६॥

प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत् ॥

वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमाना: ॥७॥

एतद् वचो जरितर्माऽपि मृष्ठा आ यत् ते घोषानुत्तरा युगानि ॥

उक्थेषु कारो प्रति नो जुषस्व मा नो नि क: पुरुषत्रा नमस्ते ॥८॥

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ॥

नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥ ९ ॥

आ ते कारो शृणवामा वचाँसि ययाथ दूरादनसा रथेन ॥

नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥ १० ॥

यदङ्ग त्वा भरताः सन्तरेयुर्गव्यन् ग्राम इषित इन्द्रजूतः ॥

अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम् ॥ ११ ॥

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम् ॥

प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम् ॥ १२ ॥

उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत ॥

मा दुष्कृतौ व्येनसाऽघ्न्यौ शूनमारताम् ॥ १३ ॥

२ ओऽ२ं

(१६) ॥ अथ ~~चतुर्दशं~~ सूक्तम् ॥ (१४)

(१६) ॥ यमी ब्रह्मवादिनी ॥

ऋक् · मं · १० । १५४ । १-५ ॥ यमी ऋषिका । भाववृत्तं देवता । अनुष्टुप् छन्दः ॥

तथा च सर्वानुक्रमसूत्रम् - "सोमो यमी भाववृत्तमानुष्टुभं तु" इति

२

"सोम एकेभ्यः पवते घृतमेक उपासते ॥

येभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छतात् ॥ १ ॥

तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ॥

तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ॥ २ ॥

ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः ॥

ये वा सहस्रदक्षिणास्ताँश्चिदेवापि गच्छतात् ॥ ३ ॥

ये चित् पूर्वे ऋतसाप ऋतावान ऋतावृधः ॥
पितॄन् तपस्वतो यम ताँश्चिदेवापि गच्छतात् ॥ ४ ॥
सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम् ॥
ऋषीँस्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥ ५ ॥

(१७) ॥ अथ पञ्चदशं सूक्तम् ॥ (१५)

(१६) "यमी - ब्रह्मवादिनी"

ऋक्. मं. १०।१०।१-१४ ॥ ऋक्. १, ३, ५, ७, ११, १३ यमी वैवस्वती ऋषिका ॥
यमो देवता ॥ ऋक्. २, ४, ८-१०, १२, १४। यमः वैवस्वतः ऋषिः। यमी देवता ॥
त्रिष्टुप् छन्दः ॥ यम-यम्योः - भ्रातृ-भगिन्योः संवादः । "सर्वानु सूत्रम"
॥ ओचित् षळूना वैवस्वतयोर्यमयम्योः संवादः, षळयुग्भिर्यमी मिथुनार्थं यमं प्रोवाच, स तां नवमीयुग्भिः अनिच्छन् प्रत्याचष्टे ॥ इति ॥

"ओ चित् सखायं सख्या ववृत्यां तिरः पुरु चिदर्णवं जगन्वान् ॥
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥ १ ॥ (यमी)
न ते सखा सख्यं वष्ट्येतत् सलक्ष्मा यद्विषुरूपा भवाति ॥
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥ २ ॥ (यमः)
उशन्ति घा ते अमृतास एतदेकस्य चित् त्यजसं मर्त्यस्य ॥
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्वमा विविश्याः ॥ ३ ॥ (यमी)
न यत् पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ॥
गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥ ४ ॥ (यमः)
गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः ॥
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥ ५ ॥ (यमी)

को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ॥
बृहन् मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥६॥ (यमी)
यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय ॥
जायेव पत्ये तन्वं रिरिच्यां वि चिद् वृहेव रथ्येव चक्रा ॥७॥ (यमी)
न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ॥
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥८॥ (यमः)
रात्रीभिरस्मा अहभिर्दशस्येत् सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ॥
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य बिभृयादजामि ॥९॥ (यमः)
आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ॥
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥१०॥ (यमः)
किं भ्रातासद् यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात् ॥
काममूता बह्वे३तद्रपामि तन्वा मे तन्वं१ सं पिपृग्धि ॥११॥ (यमी)
न वा उ ते तन्वा तन्वं१ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ॥
अन्येन मत् प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१२॥ (यमः)
बतो बतासि यम नैव ते मनो हृदयं चाविदाम ॥
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षम् ॥१३॥ (यमी)
अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम् ॥
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥१४॥ (यमः)

—

अष्टादशं (२३) सर्वानु-सूत्रम्: "प्लायोगिश्चासङ्गः
~~षष्ठदशं~~ (यः स्त्री भूत्वा पुमानभूत् सः -
१८ (~~३-७~~) ॥ अथ ~~षोडशं~~ सूक्तम् ॥ (मेध्यातिथये दानं दत्वा
स्तुहि स्तुहीति चतसृभि-
(१७) ॥ शश्वती ॥ (रात्मानं तुष्टाव, पत्नी चास्याङ्गिरसी
(पुंस्त्वमुपलभ्यैनं प्रीताऽन्त्यया तुष्टाव॥ इति ॥

ऋक्.मं. ८।१।३०-३४ ॥ ऋक्. ३०-३३, आसङ्गः ऋषिः। दानस्तुतिः देवता। ऋक्. ३४ शश्वती ऋषिका। आसङ्गो देवता ॥

३०-३२ बृहती छन्दः, ३३,३४ त्रिष्टुप् छन्दः ॥

स्तुहि स्तुही॒दे॒ते घा॑ ते॒ मंहि॑ष्ठासो म॒घोना॑म् ॥
नि॒न्दि॒ताश्वः॑ प्रप॒थी प॑रम॒ज्या म॒घस्य॑ मेध्यातिथे ॥१॥ (३०)
(आसङ्गः)
आ यदश्वा॒न् वन॑न्वतः श्र॒द्धया॒ऽहं रथे॑ रु॒हम् ॥
उ॒त वा॒मस्य॒ वसु॑नश्चिकेतति॒ यो अस्ति॒ याद्वः॑ प॒शुः ॥२॥ (३१)
य ऋ॒ज्रा मह्यं॑ माम॒हे स॒ह त्व॒चा हिर॒ण्यया॑ ॥
ए॒ष विश्वा॑न्य॒भ्य॑स्तु॒ सौभ॑गा॒ऽऽस॒ङ्गस्य॑ स्व॒नद्र॑थः ॥३॥ (३२)
अध॒ प्लायो॑गि॒रति॑ दासद॒न्याना॑स॒ङ्गो अ॑ग्ने द॒शभिः॑ स॒हस्रैः॑ ॥
अधो॒क्षणो॒ दश॒ मह्यं॒ रुश॑न्तो न॒ळा इ॑व॒ सर॑सो॒ निर॑तिष्ठन् ॥४॥ (३३)
अन्व॑स्य स्थू॒रं द॑दृशे पु॒रस्ता॑दन॒स्थ ऊ॒रुर॑व॒रम्ब॑मानः ॥
शश्व॑ती॒ नार्य॑भि॒चक्ष्या॑ह॒ सुभ॑द्रमर्य॒ भोज॑नं बिभर्षि ॥५॥ (३४)
(शश्वती)

---

~~अष्टादशं~~ एकोनविंशं
(१९) ॥ अथ ~~सप्तदशं~~ सूक्तम् ॥ (१७)

~~३०~~ १८ (~~१८~~) ॥ सार्पराज्ञी ॥

ऋक्. मं. १०।१८९।१-३ ॥ सार्पराज्ञी ऋषिका। आत्मा देवता
सूर्यो वा। गायत्री छन्दः ॥
सौर्या वा ॥
"आयं गौः सार्पराज्ञी आत्मदैवतम्"॥ (स. सूत्रम्)

॥ आऽयं गौः सार्पराज्ञी, आत्मा, गायत्री ॥

"आऽयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥१॥
अन्तश्चरति रोचनाऽस्य प्राणादपानती ।
व्यख्यन्महिषो दिवम् ॥२॥
त्रिंशद्धाम विराजति वाक्पतङ्गाय धीयते ।
प्रति वस्तोरह द्युभिः ॥३॥

२
~~एकोनविंशं~~ विंशं

(२०) ॥ अथ ~~अष्टादशं~~ सूक्तम् ॥ (१९)

(१९) ॥ वाक् - आम्भृणी ॥
(सू० १२५)

ऋक्० मं०१०।१-८ ॥ वाक् आम्भृणी ऋषिका।(आत्मस्तुतिः) आत्मा देवता। वाग् वा ॥१,३-८ त्रिष्टुप्। २ जगती ॥

"अहमष्टौ वागाम्भृण्यात्मानं तुष्टाव, द्वितीया जगती ॥(अ०सूत्रम्)

"अहं रुद्रेभिर्वसुभिश्चरामि - अहमादित्यैरुत विश्वदेवैः ॥
अहं मित्रावरुणोभा बिभर्मि - अहमिन्द्राग्नी अहमश्विनोभा ॥१॥
अहं सोममाहनसं बिभर्मि - अहं त्वष्टारमुत पूषणं भगम् ॥
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते ॥ ॥२॥
अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ॥
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ ॥३॥
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ॥
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ ॥४॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ॥
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५ ॥
अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ ॥
अहं जनाय समदं कृणोमि - अहं द्यावापृथिवी आ विवेश ॥
॥ ६ ॥
अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः समुद्रे ॥
ततो वि तिष्ठे भुवनाऽनु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥
॥ ७ ॥
अहमेव वात इव प्र वामि - आरभमाणा भुवनानि विश्वा ॥
परो दिवा पर एना पृथिव्या - एतावती महिना सं बभूव ॥ ८ ॥

## (२१) ॥ अथ ~~एकोनविंशं~~ एकविंशं सूक्तम् ॥ (१९)

## (२१) ॥ श्रद्धा - कामायनी ॥

ऋ. मं १०।१५१।१-५ ॥ श्रद्धा कामायनी ऋषिका। श्रद्धा देवता।
अनुष्टुप् छन्दः ॥ "श्रद्धया श्रद्धा कामायनी श्राद्ध मानुष्टुभम् ॥ (स.म.)

"श्रद्धयाऽग्निः समिध्यते श्रद्धया हूयते हविः ॥
श्रद्धां भगस्य मूर्धनि वचसाऽऽवेदयामसि ॥ १ ॥
प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः ॥
प्रियं भोजेषु यज्वसु - इदं म उदितं कृधि ॥ २ ॥
यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे ॥
एवं भोजेषु यज्वसु - अस्माकमुदितं कृधि ॥ ३ ॥
श्रद्धां देवा यजमाना वायुगोपा उपासते ॥
श्रद्धां हृदय्य१याऽऽकूत्या श्रद्धया विन्दते वसु ॥ ४ ॥

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यन्दिनं परि ॥
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥५॥

२२ त्रयोविंशं द्वाविंशं

(२१) ॥ अथ विंशं सूक्तम् ॥ (२०)

(२२)३१ ॥ दक्षिणा ॥

ऋ.मं.१०।१०७।१-११ ॥ दक्षिणा प्राजापत्या ऋषिका। दक्षिणा देवता। तद्दातारो वा ॥ १-३, ५-११, त्रिष्टुप्, ४. जगती छन्दः ॥

सर्वानुक्रमसूत्रम्- "आविर्दिव्यो दक्षिणा वा प्राजापत्या दक्षिणां तद्दातृन् वाऽस्तौत्, चतुर्थी जगती ॥ इति ॥

"आविरभून्महि माघोन मेषां विश्वं जीवं तमसो निरमोचि ॥
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥१॥
उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण ॥
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥२॥
दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ॥
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ॥३॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ॥
ये पृणन्ति प्र च यच्छन्ति सङ्गमे ते दक्षिणां दुहते सप्तमातरम् ॥४॥
दक्षिणावान् प्रथमो हूत एति दक्षिणावान् ग्रामणीरग्रमेति ॥
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥५॥
तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ॥
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥६॥

दक्षिणाऽश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम्॥
दक्षिणाऽन्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन्॥ ॥७॥
न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः॥
इदं यद् विश्वं भुवनं स्वश्चैतत् सर्वं दक्षिणेभ्यो ददाति॥८॥
भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१या सुवासाः॥
भोजा जिग्युरन्तःपेयं सुराया भोजा जिग्युर्ये अहूताः प्रयन्ति॥ ॥९॥
भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या३ शुम्भमाना॥
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम्॥ ॥१०॥
भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद्रथो वर्तते दक्षिणायाः॥
भोजं देवासोऽवता भरेषु भोजः शत्रून् समनीकेषु जेता॥ ॥११॥

त्रयोविंशत्

(२३) ॥ अथ ~~एकविंशं~~ त्रयोविंशं सूक्तम्॥ (२१)

(२३) रात्री॥

ऋक्. मं. १०।१२७।१-८॥ रात्री भारद्वाजी ऋषिका। रात्रिस्तवं, रात्री देवता। गायत्री छन्दः॥" रात्री कुशिकः सोभरो रात्रिर्वा भारद्वाजी रात्रिस्तवं गायत्रम्॥ (स. सूत्रम्)

" रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः॥
विश्वा अधि श्रियोऽधित ॥१॥
ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः॥
ज्योतिषा बाधते तमः॥२॥

निरु स्वसारमस्कृतोषसं देव्यायती ॥
अपेदु हासते तमः ॥ ३ ॥
सा नो अद्य यस्या वयं नि ते यामन् अविक्ष्महि ॥
वृक्षे न वसतिं वयः ॥ ४ ॥
नि ग्रामासो अविक्षत नि पद्वन्तो निपक्षिणः ॥
नि श्येनासश्चिदर्थिनः ॥ ५ ॥
यावया वृक्यं वृकं यवय स्तेनमूर्म्ये ॥
अथा नः सुतरा भव ॥ ६ ॥
उप मा पेपिशत् तमः कृष्णं व्यक्त मस्थित ॥
उष ऋणेव यातय ॥ ७ ॥
उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ॥
रात्रि स्तोमं न जिग्युषे ॥ ८ ॥

~~द्वाविंशं~~ चतुर्विंशं

(२४) ॥ अथ ~~द्वाविंशं~~ सूक्तम् ॥ (~~२२~~)

(~~१४~~) २२ ॥ सूर्या सावित्री ॥

ऋक्. मं. १०।८५।१-४७ ॥ सूर्या सावित्री ऋषिका। १-५ सोमो देवता। ६-१६ सूर्याविवाहः ॥ १७ देवाः। १८ सोमार्कौ। १९ चन्द्रमाः ॥ २०-२८, नृणां विवाहमन्त्राः आशीः प्रायाः। २९, ३०, वधूवासः-संस्पर्शनिन्दा। ३१ यक्ष्मनाशिनी दम्पत्योः। ३२-४७ सूर्या देवता ॥ १-१३, १५-१७, २२, २५, २८-३३, ३५, ३९-४२, ४५-४७, अनुष्टुप् छन्दः ॥ १४, १९-२१, २३, २४, २६, ३६, ३७, ४४, त्रिष्टुप् ॥ १८, २७, ४३, जगती, छन्दः। ३४. उरो बृहती छन्दः ॥

"सत्येन सप्तचत्वारिंशत् सावित्री सूर्या आत्मदैवतम्, आनुष्टुभम्,
पञ्चभिः सोममस्तौत्, पराभिः स्वविवाहं, सप्तदश्या देवान् परया-
सोमार्कौ, परया चन्द्रमसम्, परा नृणां विवाहमन्त्रा आशीः प्रायाः,
परादेहीति द्वे वधूवासः संस्पर्शनिन्दार्थे, परा यक्ष्मनाशिनी दम्पत्योः
नवो नवस्तिस्रो ऽनृक्षरा गृभ्णामीति द्वे द्वे, यदश्विना पूषा अघोरचक्षुरिति
त्रिष्टुभः त्रिष्टुबुरो बृहती पूर्वापरमिह मा[illegible] नः प्रियां जगत्यः॥ इति स.कृ. ॥

"सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ॥

ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥१॥

सोमेनादित्या बलिनः सोमेन पृथिवी मही ॥

अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥

सोमं मन्यते पपिवान् यत् सम्पिंषन्त्योषधिः ॥

सोमं यं ब्रह्मणो विदुर्न तस्याश्नाति कश्चन ॥३॥

आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः ॥

ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः ॥४॥

यत् त्वा देव प्रपिबन्ति तत आप्यायसे पुनः ॥

वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥५॥

रैभ्यासीदनुदेयी नाराशंसी न्योचनी ॥

सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ॥६॥

चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम् ॥

द्यौर्भूमिः कोश आसीद् यदयात् सूर्या पतिम् ॥७॥

स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ॥

सूर्याया अश्विना वराऽग्निरासीत् पुरोगवः ॥८॥

सोमो वधूयुरभवदश्विनाऽऽस्तामुभा वरा ॥

सूर्यां यत् पत्ये शंसन्तीं मनसा सविताऽददात् ॥९॥

मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः ॥
शुक्रावनड्वाहावास्तां यदयात् सूर्या गृहम् ॥१०॥
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः ॥
श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥११॥
शुची ते चक्रे यात्या व्यानो अक्ष आहतः ॥
अनो मनस्मयं सूर्याऽऽरोहत् प्रयती पतिम् ॥१२॥
सूर्याया वहतुः प्रागात् सविता यमवासृजत् ॥
अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ॥१३॥
यदश्विना पृच्छमाना वयातं त्रिचक्रेण वहतुं सूर्यायाः ॥
विश्वे देवा अनु तद्वामजानन्पुत्रः पितरावबृणीत पूषा ॥
॥१४॥
यदयातं शुभस्पती वरेयं सूर्यामुप ॥
क्वैकं चक्रं वामासीत् क्व देष्ट्राय तस्थथुः ॥१५॥
द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ॥
अथैकं चक्रं यद् गुहा तदद्धातय इद् विदुः ॥१६॥
सूर्यायै देवेभ्यो मित्राय वरुणाय च ॥
ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥१७॥
पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ॥
विश्वान्यन्यो भुवनाऽभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥
॥१८॥
नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ॥
भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः ॥
॥१९॥

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ॥
आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्यै वहतुं कृणुष्व ॥२०॥
उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे ॥
अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥
॥२१॥
उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा ॥
अन्यामिच्छ प्रफर्व्यं सं जायां पत्या सृज ॥२२॥
अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ॥
समर्यमा सं भगो नो निनीयात् सं जास्पत्यं सुयममस्तु देवाः ॥
॥२३॥
प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वा बध्नात् सविता सुशेवः ॥
ऋतस्य योनौ सुकृतस्य लोके ऽरिष्टां त्वा सह पत्या दधामि ॥
॥२४॥
प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम् ॥
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगाऽसति ॥२५॥
पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ॥
गृहान् गच्छ गृहपत्नी यथाऽसो वशिनी त्वं विदथमा वदासि ॥
॥२६॥
इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ॥
एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः ॥२७॥
नीललोहितं भवति कृत्याऽऽसक्तिर्व्यज्यते ॥
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥२८॥
परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु ॥
कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ॥२९॥

अश्रीरा तनूर्भवति रुशती पापयाऽमुया ॥
पतिर्यद् वध्वो३ वाससा स्वमङ्ग मभि धित्सते ॥३०॥
ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनादनु ॥
पुनस्तान् यज्ञियो देवा नयन्तु यत आगताः ॥३१॥
मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ॥
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥३२॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत ॥
सौभाग्यमस्यै दत्वा याथास्तं वि परेतन ॥३३॥
तृष्टमेतत् कटुकमेत दपाष्ठवद् विषवन्नैतदत्तवे ॥
सूर्यां यो ब्रह्मा विद्यात् स इद् वाधूय मर्हति ॥३४॥
आशसनं विशसन मथो अधिविकर्तनम् ॥
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥३५॥
गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽसः ॥
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः ॥ ॥३६॥
तां पूषञ्छिवतमा मेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ॥
या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥ ॥३७॥
तुभ्यमग्रे पर्यवहन् त्सूर्यां वहतुना सह ॥
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥३८॥
पुनः पत्नी मग्निरदा दायुषा सह वर्चसा ॥
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥३९॥

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ ४० ॥
सोमो ददद् गन्धर्वाय गन्धर्वो दददग्नये ।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥ ४१ ॥
इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ ४२ ॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥ ४३ ॥
अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ ४४ ॥
इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥ ४५ ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ ४६ ॥
समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सन्धाता समु देष्ट्री दधातु नौ ॥ ४७ ॥

(परिशिष्टोक्तानां ब्रह्मवादिनीनां मन्त्रदर्शनानि
समाप्तानि

## ॥ अथ त्रयोविंशं सूक्तम् ॥ (२३)

### (२४) ॥ शची पौलोमी ॥

ऋक्. मं. १०।१५९।१-६॥ शची पौलोमी ऋषिका। आत्मस्तुतिः आत्मा शची देवता। अनुष्टुप् छन्दः ॥

"उदसौ षट् पौलोमी शची-आत्मानं तुष्टाव। आनुष्टुभम्. (स.मनम्)"

—

"उदसौ सूर्यो अगाद्-उदयं मामको भगः॥
अहं तद् विद्वला पतिमभ्यसाक्षि विषासहिः॥१॥
अहं केतुरहं मूर्धा ऽहमुग्रा विवाचनी॥
ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्॥२॥
मम पुत्राः शत्रुहणः अथो मे दुहिता विराट्॥
उताहमस्मि सञ्जया पत्यौ मे श्लोक उत्तमः॥३॥
येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः॥
इदं तदक्रि देवा असपत्ना किलाभुवम्॥४॥
असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी॥
आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव॥५॥
समजैषमिमा अहं सपत्नीरभिभूवरी॥
यथाऽहमस्य वीरस्य विराजानि जनस्य च॥६॥

—

(इयं अवशिष्टा विशिष्टा शची पौलोमी)

ब्रह्मवादिनी

—